

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता — क्रम पाठः

## प्रथमकाण्डे द्वितीयः प्रश्नः

### अग्निष्टोमे क्रयः

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

आप॑ उन्दन्तु। उ॒न्द॒न्तु॒ जी॒वसे᳚। जी॒वसे॑ दी॒र्घा॒यु॒त्वाय॑। दी॒र्घा॒यु॒त्वाय॒ वर्च॑से। दी॒र्घा॒यु॒त्वायेति॑ दीर्घायु—त्वाय॑। वर्च॑स॒ ओष॑धे। ओष॑धे॒ त्राय॑स्व। त्राय॑स्वैनम्। ए॒न॒ꣳ॒ स्वधि॑ते। स्वधि॑ते॒ मा। स्वधि॑त॒ इति॒ स्व—धि॒ते॒। मैन᳚म्। ए॒न॒ꣳ॒ हि॒ꣳ॒सीः॒। हि॒ꣳ॒सीर् दे॒वश्रूः। दे॒वश्रू॒रेतानि॑। दे॒वश्रू॒रिति॑ देव—श्रूः। ए॒तानि॒ प्र। प्र व॑पे। व॒पे॒ स्व॒स्ति। स्व॒स्त्युत्त॑राणि। उत्त॑राण्यशीय। उत्त॑रा॒णीत्युत्—त॒रा॒णि॒। अ॒शी॒याप॑ः। आपो॑ अ॒स्मान्। अ॒स्मान् मा॒तर॑ः। मा॒तर॑ः शुन्धन्तु। शु॒न्ध॒न्तु॒ घृतेन॑। घृ॒तेन॑ नः। नो॒ घृ॒त॒पुव॑ः। घृ॒त॒पुव॑ः पुनन्तु। घृ॒त॒पु॒व इति॑ घृत—पुव॑ः। पु॒न॒न्तु॒ विश्व᳚म्। विश्व॑-म॒स्मत्। अ॒स्मत् प्र। प्र व॑हन्तु। व॒ह॒न्तु॒ रि॒प्रम्। रि॒प्रमुत्। उदा᳚भ्यः। आ॒भ्य॒ः शुचि॑ः। शु॒चि॒रा। आ पू॒तः। पू॒त ए॑मि। ए॒मि॒ सोम॑स्य। सोम॑स्य त॒नूः। त॒नूर॑सि। अ॒सि॒ त॒नुव᳚म्। त॒नुव॑म् मे। मे॒ पा॒हि॒। पा॒हि॒ म॒ही॒नाम्। म॒ही॒नाम् पय॑ः। पयो॑ऽसि। अ॒सि॒ व॒र्चो॒धाः। व॒र्चो॒धा अ॑सि। व॒र्चो॒धा इति॑ वर्च॑ः—धाः। अ॒सि॒ वर्च॑ः। वर्चो॒ मयि॑। ॥ [१] ॥ मयि॑ धेहि। धे॒हि॒ वृ॒त्रस्य॑। वृ॒त्रस्य॑ क॒नी-नि॑का। क॒नीनि॑काऽसि। अ॒सि॒ च॒क्षु॒ष्पाः। च॒क्षु॒ष्पा अ॑सि। च॒क्षु॒ष्पा इति॑ चक्षुः—पाः। अ॒सि॒ चक्षु॑ः। चक्षु॑र् मे। मे॒ पा॒हि॒। पा॒हि॒ चि॒त्पति॑ः। चि॒त्पति॑स्त्वा। चि॒त्प॒तिरिति॑ चित्—पति॑ः। त्वा॒ पु॒ना॒तु॒। पु॒ना॒तु॒ वा॒क्पति॑ः। वा॒क्पति॑स्त्वा। वा॒क्प॒तिरिति॑ वाक्—पति॑ः। त्वा॒ पु॒ना॒तु॒। पु॒ना॒तु॒ दे॒वः। दे॒वस्त्वा᳚। त्वा॒ स॒वि॒ता। स॒वि॒ता पु॑नातु। पु॒ना॒त्वच्छि॑द्रेण। अच्छि॑द्रेण प॒वित्रे॑ण। प॒वित्रे॑ण॒ वसो᳚ः। व॒सो॒ः सूर्य॑स्य। सूर्य॑स्य र॒श्मिभि॑ः। र॒श्मिभि॒स्तस्य॑। र॒श्मिभि॒रिति॑ र॒श्मि—भि॒ः।

तस्यं ते। ते पवित्रपते। पवित्रपते पवित्रेण। पवित्रपत इति पवित्र—पते। पवित्रेण यस्मै। यस्मै कम्। कम् पुने। पुने तत्। तच्छकेयम्। शकेयमा। आ वः। वो देवासः। देवास ईमहे। ईमहे सत्यधर्माणः। सत्यधर्माणो अद्ध्वरे। सत्यधर्माण इति सत्य—धर्माणः। अद्ध्वरे यत्। यद्वः। वो देवासः। देवास आगुरे। आगुरे यज्ञियासः। आगुर इत्या—गुरे। यज्ञियासो हवामहे। हवामह इन्द्राग्नी। इन्द्राग्नी द्यावापृथिवी। इन्द्राग्नी इतीन्द्र—अग्नी। द्यावापृथिवी आपः। द्यावापृथिवी इति द्यावा—पृथिवी। आप ओषधीः। ओषधीस्त्वम्। त्वम् दीख्षाणाम्। दीख्षाणामधिपतिः। अधिपतिरसि। अधिपतिरित्यधि—पतिः। असीह। इह मा। मा सन्तम्। सन्तम् पाहि। पाहीति पाहि॥ ॥ [२] ॥

(वर्च ओषधीरष्टौ च) ॥ १ ॥

---

आकूत्यै प्रयुजे। आकूत्या इत्या—कूत्यै। प्रयुजे ऽग्नये। प्रयुज इति प्र—युजे। अग्नये स्वाहा। स्वाहा मेधायै। मेधायै मनसे। मनसे ऽग्नये। अग्नये स्वाहा। स्वाहा दीख्षायै। दीख्षायै तपसे। तपसे ऽग्नये। अग्नये स्वाहा। स्वाहा सरस्वत्यै। सरस्वत्यै पूष्णे। पूष्णे ऽग्नये। अग्नये स्वाहा। स्वाहा ऽऽपः। आपो देवीः। देवीर् बृहतीः। बृहतीर् विश्वशम्भुवः। विश्वशम्भुवो द्यावापृथिवी। विश्वशम्भुव इति विश्व—शम्भुवः। द्यावापृथिवी उरु। द्यावापृथिवी इति द्यावा—पृथिवी। उर्वन्तरिख्षम्। अन्तरिख्षम् बृहस्पतिः। बृहस्पतिर् नः। नो हविषा। हविषा वृधातु। वृधातु स्वाहा। स्वाहा विश्वे। विश्वे देवस्य। देवस्य नेतुः। नेतुर् मर्तः। मर्तो वृणीत। वृणीत सख्यम्। सख्यँविश्वे। विश्वे रायः। राय इषुद्ध्यसि। इषुद्ध्यसि द्युम्नम्। द्युम्नँवृणीत। वृणीत पुष्यसे। पुष्यसे स्वाहा। स्वाहर्ख्सामयोः। ऋख्सामयोः शिल्पे। ऋख्सामयोरित्यृक्—सामयोः। शिल्पे स्थः। शिल्पे इति शिल्पे। स्थस्ते। ते वाम्। ते इति ते। वामा। आ रभे। रभे ते। ते मा। ते इति ते। मा पातम्। ॥ [३] ॥ पातमा। आ ऽस्य। अस्य यज्ञस्य। यज्ञस्योदृचः। उदृच इमाम्। उदृच इत्युत्—ऋचः। इमाम् धियम्। धियꣳ शिख्षमाणस्य। शिख्षमाणस्य देव। देव क्रतुम्। क्रतुम् दख्षम्। दख्षँवरुण। वरुण सम्। सꣳ शिशाधि। शिशाधि यया। ययाऽति। अति विश्वा। विश्वा दुरिता। दुरिता तरेम। दुरितेति दुः—इता। तरेम सुतर्माणम्। सुतर्माण-

मधि। सुतर्माणमिति सु—तर्माणम्। अधि नावम्। नावꣳ रुहेम। रुहेमोर्क्। ऊर्गसि। अस्या-ङ्गिरसी। आङ्गिरस्यूर्णम्रदाः। ऊर्णम्रदा ऊर्जम्। ऊर्णम्रदा इत्यूर्ण—म्रदाः। ऊर्जम् मे। मे यच्छ। यच्छ पाहि। पाहि मा। मा मा। मा मा। मा हिꣳसीः। हिꣳसीर् विष्णोः। विष्णोः शर्म। शर्मासि। असि शर्म। शर्म यजमानस्य। यजमानस्य शर्म। शर्म मे। मे यच्छ। यच्छ नख्षत्राणाम्। नख्षत्राणाम् मा। मा ऽतीकाशात्। अतीकाशात् पाहि। पाहीन्द्रस्य। इन्द्रस्य योनिः। योनिरसि। असि मा। ॥ [४] ॥ मा मा। मा हिꣳसीः। हिꣳसीः कृष्यै। कृष्यै त्वा। त्वा सुसस्यायै। सुसस्यायै सुपिप्पलाभ्यः। सुसस्याया इति सु—सस्यायै। सुपिप्पलाभ्यस्त्वा। सुपिप्पलाभ्य इति सु—पिप्पलाभ्यः। त्वौषधीभ्यः। ओषधीभ्यः सूपस्थाः। ओषधीभ्य इत्यो-षधि—भ्यः। सूपस्था देवः। सूपस्था इति सु—उपस्थाः। देवो वनस्पतिः। वनस्पतिरूद्ध्वः। ऊद्ध्वो मा। मा पाहि। पाह्या। ओदृचः। उदृचः स्वाहा। उदृच इत्युत्—ऋचः। स्वाहा यज्ञम्। यज्ञम् मनसा। मनसा स्वाहा। स्वाहा द्यावापृथिवीभ्याम्। द्यावापृथिवीभ्याꣳ स्वाहा। द्यावा-पृथिवीभ्यामिति द्यावा—पृथिवीभ्याम्। स्वाहोरोः। उरोरन्तरिख्षात्। अन्तरिख्षाथ् स्वाहा। स्वाहा यज्ञम्। यज्ञँव्वातात्। वातादा। आ रभे। रभ इति रभे॥ ॥ [५] ॥

(मा योनिरसि त्रिꣳशच्च) ॥ २ ॥

---

दैवीम् धियम्। धियम् मनामहे। मनामहे सुमृडीकाम्। सुमृडीकामभिष्टये। सुमृडीकामिति सु—मृडीकाम्। अभिष्टये वर्चोधाम्। वर्चोधाय्ँयज्ञवाहसम्। वर्चोधामिति वर्चः—धाम्। यज्ञवा-हसꣳ सुपारा। यज्ञवाहसमिति यज्ञ—वाहसम्। सुपारा नः। सुपारेति सु—पारा। नो असत्। असद्वशे। वश इति वशे॥ ये देवाः। देवा मनोजाताः। मनोजाता मनोयुजः। मनोजाता इति मनः—जाताः। मनोयुजः सुदख्षाः। मनोयुज इति मनः—युजः। सुदख्षा दख्षपितारः। सुदख्षा इति सु—दख्षाः। दख्षपितारस्ते। दख्षपितार इति दख्ष—पितारः। ते नः। नः पान्तु। पान्तु ते। ते नः। नोऽवन्तु। अवन्तु तेभ्यः। तेभ्यो नमः। नमस्तेभ्यः। तेभ्यः स्वाहा। स्वाहाऽग्ने। अग्ने त्वम्। त्वꣳ सु। सु जागृहि। जागृहि वयम्। वयꣳ सु। सु मन्दिषीमहि। मन्दिषीमहि गोपाय। गोपाय नः। नः स्वस्तये। स्वस्तये प्रबुधे। प्रबुधे नः। प्रबुध इति प्र—

बुधे॑। नः पुनः॑। पुन॑र् ददः। दद इति॑ ददः॥ त्वम॑ग्ने। अग्ने व्रतपाः। व्रतपा अ॑सि। व्रतपा इति॑ व्रत—पाः। असि देवः। देव आ। आ मर्त्ये॑षु। मर्त्ये॑ष्वा। एत्या॥ त्वय्ँ यज्ञेषु। ॥ [६] ॥

यज्ञेष्वीड्यः॑। ईड्य इतीड्यः॑॥ विश्वे॑ देवाः। देवा अभि। अभि माम्। मामा। आऽव॑वृत्रन्न्। अववृत्रन् पूषा। पूषा सन्या। सन्या सोमः॑। सोमो राध॑सा। राध॑सा देवः। देवः स॑विता। सविता वसोः॑। वसो॑र् वसुदावा॑। वसुदावा रास्व। वसुदावेति॑ वसु—दावा॑। रास्वेय॑त्। इय॑थ् सोम। सोमा। आ भूयः॑। भूयो॑ भर। भर मा। मा पृणन्न्। पृणन् पूर्त्या। पूर्त्या वि। वि रा॑धि। राधि मा। माऽहम्। अहमायु॑षा। आयु॑षा चन्द्रम्। चन्द्रम॑सि। असि मम॑। मम भोगा॑य। भोगा॑य भव। भव वस्त्र॑म्। वस्त्र॑मसि। असि मम॑। मम भोगा॑य। भोगा॑य भव। भवोस्रा। उस्राऽसि॑। असि मम॑। मम भोगा॑य। भोगा॑य भव। भव हयः॑। हयो॑ऽसि। असि मम॑। मम भोगा॑य। भोगा॑य भव। भव छागः॑। ॥ [७] ॥ छागो॑ऽसि। असि मम॑। मम भोगा॑य। भोगा॑य भव। भव मेषः। मेषो॑ऽसि। असि मम॑। मम भोगा॑य। भोगा॑य भव। भव वायवे॑। वायवे॑ त्वा। त्वा वरु॑णाय। वरु॑णाय त्वा। त्वा निर्ऋ॑त्यै। निर्ऋ॑त्यै त्वा। निर्ऋ॑त्या इति निः—ऋत्यै। त्वा रुद्राय॑। रुद्राय॑ त्वा। त्वा देवीः॑। देवी॑रापः। आपो अपाम्। अपान्नपात्। नपाद्यः। य ऊर्मिः। ऊर्मिर्ह॑विष्यः॑। हविष्य॑ इन्द्रियावा॑न्। इन्द्रियावा॑न् मदिन्त॑मः। इन्द्रियावानिती॑न्द्रिय—वान्। मदिन्त॑मस्तम्। तव्ँ॑वः। वो मा। माऽव॑। अव॑ क्रमिषम्। क्रमिषमच्छि॑न्नम्। अच्छि॑न्नम् तन्तु॑म्। तन्तु॑म् पृथिव्याः। पृथिव्या अनु॑। अनु॑ गेषम्। गेषम् भद्रात्। भद्रादभि। अभि श्रेयः॑। श्रेयः प्र। प्रेहि॑। इहि बृहस्पति॑ः। बृहस्पति॑ः पुरेता। पुरएता ते॑। पुरएतेति॑ पुरः—एता। ते अस्तु। अस्त्वथ॑। अथे॑म्। ईमव॑। अव॑ स्य। स्य वरे॑। वर आ। आ पृ॑थिव्याः। पृथिव्या आरे। आरे शत्रू॑न्। शत्रू॑न् कृणुहि। कृणुहि सर्व॑वीरः। सर्व॑वीर आ। सर्व॑वीर इति सर्व॑—वीरः। एदम्। इदम॑गन्म। अगन्म देवयज॑नम्। देवयज॑नम् पृथिव्याः। देवयज॑नमिति॑ देव—यज॑नम्। पृथिव्या विश्वे॑। विश्वे॑ देवाः। देवा यत्। यदजु॑षन्त। अजु॑षन्त पूर्वे॑। पूर्वे॑ ऋक्सामाभ्या॑म्। ऋक्सामाभ्याय्ँ यजु॑षा। ऋक्सामा-भ्यामित्यृ॑क्साम—भ्याम्। यजु॑षा सन्तर॑न्तः। सन्तर॑न्तो रायः। सन्तर॑न्त इति॑ सम्—तर॑न्तः। रायस्पोषे॑ण। पोषे॑ण सम्। समिषा। इषा मदे॑म। मदेमेति॑ मदेम॥ ॥ [८] ॥

(आ त्वश्हयो॑ऽसि मम भोगा॑य भवस्यपञ्चविश्शतिश्च) ॥ ३ ॥

इयम् ते। ते शुक्र। शुक्र तनूः। तनूरिदम्। इदँव्वर्चः। वर्चस्तया। तया सम्। सम् भव। भव भ्राजम्। भ्राजम् गच्छ। गच्छ जूः। जूरसि। असि धृता। धृता मनसा। मनसा जुष्टा। जुष्टा विष्णवे। विष्णवे तस्याः। तस्यास्ते। ते सत्यसवसः। सत्यसवसः प्रसवे। सत्यसवस इति सत्य—सवसः। प्रसवे वाचः। प्रसव इति प्र—सवे। वाचो यन्त्रम्। यन्त्रमशीय। अशीय स्वाहा। स्वाहा शुक्रम्। शुक्रमसि। अस्यमृतम्। अमृतमसि। असि वैश्वदेवम्। वैश्वदेवꣳ हविः। वैश्वदेवमिति वैश्व—देवम्। हविः सूर्यस्य। सूर्यस्य चख्षुः। चख्षुरा। आ ऽरुहम्। अरुहमग्नेः। अग्नेरख्ष्णः। अख्ष्णः कनीनिकाम्। कनीनिकाय्यँत्। यदेतशेभिः। एतशेभि-रीयसे। ईयसे भ्राजमानः। भ्राजमानो विपश्चिता। विपश्चिता चित्। चिदसि। असि मना। मनाऽसि। असि धीः। धीरसि। असि दख्षिणा। दख्षिणाऽसि। ॥ [९] ॥ असि यज्ञिया। यज्ञियाऽसि। असि ख्षत्रिया। ख्षत्रियाऽसि। अस्यदितिः। अदितिरसि। अस्युभयतश्शीर्ष्णी। उभयतश्शीर्ष्णी सा। उभयतश्शीर्ष्णीत्युभयतः—शीर्ष्णी। सा नः। नः सुप्राची। सुप्राची सुप्र-तीची। सुप्राचीति सु—प्राची। सुप्रतीची सम्। सुप्रतीचीति सु—प्रतीची। सम् भव। भव मित्रः। मित्रस्त्वा। त्वा पदि। पदि बद्ध्नातु। बद्ध्नातु पूषा। पूषा ऽद्ध्वनः। अद्ध्वनः पातु। पात्वि-न्द्राय। इन्द्रायाद्ध्यख्षाय। अद्ध्यख्षायानु। अद्ध्यख्षायेत्यधि—अख्षाय। अनु त्वा। त्वा माता। माता मन्यताम्। मन्यतामनु। अनु पिता। पिताऽनु। अनु भ्राता। भ्राता सगर्भ्यः। सगर्भ्योऽनु। सगर्भ्य इति स—गर्भ्यः। अनु सखा। सखा सयूथ्यः। सयूथ्यः सा। सयूथ्य इति स—यूथ्यः। सा देवि। देवि देवम्। देवमच्छ। अच्छेहि। इहीन्द्राय। इन्द्राय सोमम्। सोमꣳ रुद्रः। रुद्रस्त्वा। त्वा। आ वर्तयतु। वर्तयतु मित्रस्य। मित्रस्य पथा। पथा स्वस्ति। स्वस्ति सोमसखा। सोमसखा पुनः। सोमसखेति सोम—सखा। पुनरा। एहि। इहि सह। सह रय्या। रय्येति रय्या॥ ॥ [१०] ॥

(दख्षिणासोमसखापञ्च च) ॥ ४ ॥

वस्व्य॑सि। अ॒सि॒ रु॒द्रा। रु॒द्राऽसि॑। अ॒स्यदि॑तिः। अदि॑तिरसि। अ॒स्या॒दि॒त्या। आ॒दि॒त्याऽसि॑। अ॒सि॒ शु॒क्रा। शु॒क्राऽसि॑। अ॒सि॒ च॒न्द्रा। च॒न्द्राऽसि॑। अ॒सि॒ बृह॒स्पति॑ः। बृह॒स्पति॑स्त्वा। त्वा॒ सु॒म्ने। सु॒म्ने र॑ण्वतु। र॒ण्व॒तु॒ रु॒द्रः। रु॒द्रो वसु॑भिः। वसु॑भि॒रा। वसु॑भि॒रिति॒ वसु॒—भिः। आ चि॑केतु। चि॒के॒तु॒ पृ॒थि॒व्याः। पृ॒थि॒व्यास्त्वा᳚। त्वा॒ मू॒र्द्धन्न्। मू॒र्द्धन्ना। आ जि॑घर्मि। जि॒घ॒र्मि॒ दे॒व॒यज॑ने। दे॒व॒-यज॑न॒ इडा॑याः। दे॒व॒यज॑न॒ इति॑ दे॒व—यज॑ने। इडा॑याः प॒दे। प॒दे घृ॒तव॑ति। घृ॒तव॑ति॒ स्वाहा᳚। घृ॒तव॒तीति॑ घृ॒त—व॒ति॒। स्वाहा॒ परि॑लिखितम्। परि॑लिखित॒ꣳ॒ रख्ष॑ः। परि॑लिखित॒मिति॒ परि॑—लि॒खि॒त॒म्। रख्ष॒ः परि॑लिखिताः। परि॑लिखिता॒ अरा॑तयः। परि॑लिखिता॒ इति॒ परि॑—लि॒खि॒ता॒ः। अरा॑तय इ॒दम्। इ॒दम॒हम्। अ॒हꣳ रख्ष॑सः। रख्ष॑सो ग्री॒वाः। ग्री॒वा अपि॑। अपि॑ कृन्तामि। कृ॒न्ता॒मि॒ यः। यो᳚ऽस्मान्। अ॒स्मान् द्वेष्टि॑। द्वेष्टि॒ यम्। यम् च॑। च॒ व॒यम्। व॒यम् द्वि॒ष्मः। द्वि॒ष्म इ॒दम्। इ॒दम॑स्य। अ॒स्य ग्री॒वाः। ग्री॒वा अपि॑। ॥ [११] ॥ अपि॑ कृन्तामि। कृ॒न्ता॒म्य॒स्मे। अ॒स्मे राय॑ः। अ॒स्मे इत्य॒स्मे। रा॒यस्त्वे। त्वे राय॑ः। त्वे इति॒ त्वे। रा॒यस्तोते᳚। तोते॒ राय॑ः। राय॒ः सम्। सम् दे॑वि। दे॒वि॒ दे॒व्या। दे॒व्योर्व॒श्या᳚। उ॒र्व॒श्या॑ पश्यस्व। प॒श्य॒स्व॒ त्वष्टी॑मती। त्वष्टी॑मती ते। ते॒ स॒पे॒य॒। स॒पे॒य॒ सु॒रेता᳚ः। सु॒रेता॒ रेत॑ः। सु॒रेता॒ इति॑ सु॒—रेता᳚ः। रेतो॒ दधा॑ना। दधा॑ना वी॒रम्। वी॒रव्विँ॑देय। वि॒दे॒य॒ तव॑। तव॑ स॒न्दृशि॑। स॒न्दृशि॒ मा। स॒न्दृशीति॑ सं॒—दृशि॑। माऽहम्। अ॒हꣳ रा॒यः। रा॒यस्पोषे॑ण। पोषे॑ण॒ वि। वि योष॑म्। यो॒षमिति॑ योषम्॥ ॥ [१२] ॥

(अ॒स्य ग्री॒वाएका॒न्न त्रि॒ꣳ॒शच्च॑) ॥ ५ ॥

अ॒ꣳ॒शुना॑ ते। ते॒ अ॒ꣳ॒शुः। अ॒ꣳ॒शुः पृ॑च्यताम्। पृ॒च्य॒ता॒म् परु॑षा। परु॑षा॒ परु॑ः। परु॑र्॒ ग॒न्धः। ग॒न्धस्ते᳚। ते॒ काम॑म्। काम॑मवतु। अ॒व॒तु॒ मदा॑य। मदा॑य॒ रस॑ः। रसो॒ अच्यु॑तः। अच्यु॑-तो॒ऽमात्य॑ः। अ॒मात्यो॑ऽसि। अ॒सि॒ शु॒क्रः। शु॒क्रस्ते᳚। ते॒ ग्रह॑ः। ग्र॒हो॒ऽभि। अ॒भि त्यम्। त्यम्॒ दे॒वम्। दे॒वꣳ स॑वि॒तार᳚म्। स॒वि॒तार॑मू॒ण्यो᳚ः। ऊ॒ण्यो᳚ः क॒विक्र॑तुम्। क॒विक्र॑तुमर्ची॑मि। क॒विक्र॑तु॒-मिति॑ क॒वि—क्र॒तु॒म्। अर्ची॑मि स॒त्यस॑वसम्। स॒त्यस॑वसꣳ र॒त्न॒धाम्। स॒त्यस॑व॒समिति॑ स॒त्य—स॒व॒स॒म्। र॒त्न॒धाम॒भि। र॒त्न॒धामिति॑ रत्न—धाम्। अ॒भि प्रि॒यम्। प्रि॒यम् म॒तिम्। म॒तिमू॒र्द्ध्वा॑। ऊ॒र्द्ध्वा यस्य॑। यस्याम॑तिः। अ॒मति॑र्॒ भाः। भा अदि॑द्युतत्। अदि॑द्युत॒थ् सवी॑मनि। सवी॑मनि॒

हिरण्यपाणिः। हिरण्यपाणिरमिमीत। हिरण्यपाणिरिति हिरण्य—पाणिः। अमिमीत सुक्रतुः। सुक्रतुः कृपा। सुक्रतुरिति सु—क्रतुः। कृपा सुवः। सुवरिति सुवः॥ प्रजाभ्यस्त्वा। प्रजाभ्य इति प्र—जाभ्यः। त्वा प्राणाय। प्राणाय त्वा। प्राणायेति प्र—अनाय। त्वा व्यानाय। व्यानाय त्वा। व्यानायेति वि—अनाय। त्वा प्रजाः। प्रजास्त्वम्। प्रजा इति प्र—जाः। त्वमनु। अनु प्र। प्राणिहि। अनिहि प्रजाः। प्रजास्त्वाम्। प्रजा इति प्र—जाः। त्वामनु। अनु प्र। प्राणन्तु। अनन्त्वित्यनन्तु॥ ॥ [१३] ॥

(अनु सप्त च) ॥ ६ ॥

सोमम् ते। ते क्रीणामि। क्रीणाम्यूर्जस्वन्तम्। ऊर्जस्वन्तम् पयस्वन्तम्। पयस्वन्तव्ँवीर्यावन्तम्। वीर्यावन्तमभिमातिषाहम्। वीर्यावन्तमिति वीर्य—वन्तम्। अभिमातिषाहꣳ शुक्रम्। अभिमातिषाहमित्यभिमाति—साहम्। शुक्रम् ते। ते शुक्रेण। शुक्रेण क्रीणामि। क्रीणामि चन्द्रम्। चन्द्रम् चन्द्रेण। चन्द्रेणामृतम्। अमृतममृतेन। अमृतेन सम्यत्। सम्यत् ते। ते गोः। गोरस्मे। अस्मे चन्द्राणि। अस्मे इत्यस्मे। चन्द्राणि तपसः। तपसस्तनूः। तनूरसि। असि प्रजापतेः। प्रजापतेर् वर्णः। प्रजापतेरिति प्रजा—पतेः। वर्णस्तस्याः। तस्यास्ते। ते सहस्रपोषम्। सहस्रपोषम् पुष्यन्त्याः। सहस्रपोषमिति सहस्र—पोषम्। पुष्यन्त्याश्चरमेण। चरमेण पशुना। पशुना क्रीणामि। क्रीणाम्यस्मे। अस्मे ते। अस्मे इत्यस्मे। ते बन्धुः। बन्धुर् मयि। मयि ते। ते रायः। रायः श्रयन्ताम्। श्रयन्तामस्मे। अस्मे ज्योतिः। अस्मे इत्यस्मे। ज्योतिः सोमविक्रयिणि। सोमविक्रयिणि तमः। सोमविक्रयिणीति सोम—विक्रयिणि। तमो मित्रः। मित्रो नः। न आ। एहि। इहि सुमित्रधाः। सुमित्रधा इन्द्रस्य। सुमित्रधा इति सुमित्र—धाः। इन्द्रस्योरुम्। ऊरुमा। आ विश। विश दख्षिणम्। दख्षिणमुशन्न्। उशन्नुशन्तम्। उशन्तꣳ स्योनः। स्योनः स्योनम्। स्योनꣳ स्वान। स्वान भ्राज। भ्राजाङ्घारे। अङ्घारे बम्भारे। बम्भारे हस्त। हस्त सुहस्त। सुहस्त कृशानो। सुहस्तेति सु—हस्त। कृशानवेते। कृशानविति कृश—अनो। एते वः। वः सोमक्रयणाः। सोमक्रयणास्तान्। सोमक्रयणा इति सोम—क्रयणाः। तान् रख्षद्ध्वम्। रख्षद्ध्वम् मा। मा वः। वो दभन्न्। दभन्निति दभन्न्॥ ॥ [१४] ॥

(ऊरुद्वाविꣳशतिश्च) ॥ ७ ॥

उदायुषा। आयुषा स्वायुषा। स्वायुषोत्। स्वायुषेति सु—आयुषा। उदोषधीनाम्। ओष-
धीनाꣳ रसेन। रसेनोत्। उत् पर्जन्यस्य। पर्जन्यस्य शुष्मेण। शुष्मेणोत्। उदस्थाम्। अस्थाम-
मृतान्। अमृताꣳ अनु। अन्वित्यनु॥ उर्वन्तरिक्षम्। अन्तरिक्षमनु। अन्विहि। इह्यदित्याः।
अदित्याः सदः। सदोऽसि। अस्यदित्याः। अदित्याः सदः। सद आ। आ सीद। सीदा-
स्तभ्नात्। अस्तभ्नाद् द्याम्। द्यामृषभः। ऋषभो अन्तरिक्षम्। अन्तरिक्षममिमीत। अमिमीत
वरिमाणम्। वरिमाणम् पृथिव्याः। पृथिव्या आ। आ ऽसीदत्। असीदद् विश्वा। विश्वा भुव-
नानि। भुवनानि सम्राट्। सम्राड् विश्वा। सम्राडिति सं—राट्। विश्वेत्। इत् तानि। तानि वरु-
णस्य। वरुणस्य व्रतानि। व्रतानि वनेषु। वनेषु वि। व्यन्तरिक्षम्। अन्तरिक्षम् ततान। ततान
वाजम्। वाजमर्वत्सु। अर्वत्सु पयः। अर्वत्स्वित्यर्वत्—सु। पयो अघ्नियासु। अघ्नियासु हृत्सु।
हृत्सु क्रतुम्। हृत्स्विति हृत्—सु। ॥ [१५] ॥ क्रतुँव्वरुणः। वरुणो विक्षु। विक्ष्वग्निम्।
अग्निम् दिवि। दिवि सूर्यम्। सूर्यमदधात्। अदधात् सोमम्। सोममद्रौ। अद्रावुत्। उदु।
उ त्यम्। त्यम् जातवेदसम्। जातवेदसम् देवम्। जातवेदसमिति जात—वेदसम्। देवव्वँ-
हन्ति। वहन्ति केतवः। केतव इति केतवः॥ दृशे विश्वाय। विश्वाय सूर्यम्। सूर्यमिति सूर्यम्॥
उस्रावा। एतम्। इतम् धूर्षाहौ। धूर्षाहावनश्रू। धूर्षाहाविति धूः—साहौ। अनश्रू अवी-
रहणौ। अनश्रू इत्यनश्रू। अवीरहणौ ब्रह्मचोदनौ। अवीरहणावित्यवीर—हनौ। ब्रह्मचोदनौ
वरुणस्य। ब्रह्मचोदनाविति ब्रह्म—चोदनौ। वरुणस्य स्कम्भनम्। स्कम्भनमसि। असि वरु-
णस्य। वरुणस्य स्कम्भसर्जनम्। स्कम्भसर्जनमसि। स्कम्भसर्जनमिति स्कम्भ—सर्जनम्।
असि प्रत्यस्तः। प्रत्यस्तो वरुणस्य। प्रत्यस्त इति प्रति—अस्तः। वरुणस्य पाशः। पाश इति
पाशः॥ ॥ [१६] ॥

(हृत्सुपञ्चत्रिंशच्च) ॥ ८ ॥

प्र च्यव॑स्व। च्य॒व॒स्व॒ भु॒वः॒। भु॒व॒स्प॒ते॒। प॒ते॒ विश्वा॑नि। विश्वा᳚न्य॒भि। अ॒भि धामा॑नि। धामा॑नि॒ मा। मा त्वा᳚। त्वा॒ प॒रि॒परी᳚। प॒रि॒परी॒ वि॑दत्। प॒रि॒परी॒तीति॑ परि—प॒री। वि॒द॒न्मा। मा त्वा᳚। त्वा॒ प॒रि॒प॒न्थिनः॑। प॒रि॒प॒न्थिनो॑ विदन्न्। प॒रि॒प॒न्थि॒न इति॑ परि—प॒न्थिनः॑। वि॒द॒न्मा। मा त्वा᳚। त्वा॒ वृका᳚ः। वृका॑ अ॒घा॒यवः॑। अ॒घा॒यवो॒ मा। अ॒घा॒यव॒ इत्य॑घ—य॒वः॑। मा ग॑न्ध॒र्वः। ग॒न्ध॒र्वो॑ वि॒श्वाव॑सुः। वि॒श्वाव॑सु॒रा। वि॒श्वाव॑सु॒रिति॑ वि॒श्व—व॒सुः॒। आ द॑घत्। द॒घ॒च्छ्ये॒नः। श्ये॒नो भू॒त्वा। भू॒त्वा परा᳚। परा॑ पत। प॒त॒ यज॑मानस्य। यज॑मानस्य नः। नो॒ गृ॒हे। गृ॒हे दे॒वैः। दे॒वैः सꣳ॑स्कृ॒तम्। स॒ꣳ॒स्कृ॒तय्ँयज॑मानस्य। यज॑मानस्य स्व॒स्त्यय॑नी। स्व॒स्त्यय॒न्यसि। स्व॒स्त्य॒य॒नीति॑ स्वस्ति—अय॑नी। अ॒स्यपि॑। अपि॒ पन्था᳚म्। पन्था॑मगस्महि। अ॒ग॒स्म॒हि॒ स्व॒स्ति॒गाम्। स्व॒स्ति॒गाम॑ने॒हस᳚म्। स्व॒स्ति॒गामिति॑ स्वस्ति—गाम्। अ॒ने॒हस॒य्ँयेन॑। येन॒ विश्वा᳚ः। विश्वाः॒ परि॑। परि॒ द्विषः॑। द्विषो॑ वृ॒णक्ति॑। वृ॒णक्ति॑ वि॒न्दते᳚। वि॒न्दते॒ वसु॑। वसु॒ नमः॑। नमो॑ मि॒त्रस्य॑। मि॒त्रस्य॒ वरु॑णस्य। वरु॑णस्य॒ चक्ष॑से। चक्ष॑से म॒हः। म॒हो दे॒वाय॑। दे॒वाय॒ तत्। तदृ॒तम्। ऋ॒तꣳ स॑पर्यत। स॒प॒र्य॒त॒ दू॒रे॒दृशे᳚। दू॒रे॒दृशे॑ दे॒वजा॑ताय। दू॒रे॒दृश॒ इति॑ दू॒रे—दृशे᳚। दे॒वजा॑ताय के॒तवे᳚। दे॒वजा॑ता॒येति॑ दे॒व—जा॒ता॒य॒। के॒तवे॑ दि॒वः। दि॒वस्पु॒त्राय॑। पु॒त्राय॒ सूर्या॑य। सूर्या॑य शꣳसत। श॒ꣳ॒स॒त॒ वरु॑णस्य। वरु॑णस्य॒ स्कम्भ॑नम्। स्कम्भ॑नमसि। अ॒सि॒ वरु॑णस्य। वरु॑णस्य स्क॒म्भ॒स॒र्जनम्। स्क॒म्भ॒स॒र्जन॑मसि। स्क॒म्भ॒स॒र्जन॒मिति॑ स्कम्भ—स॒र्जन॑म्। अ॒स्यु॒न्मु॑क्तः। उन्मु॑क्तो॒ वरु॑णस्य। उन्मु॑क्त॒ इत्यु॑त्—मु॒क्तः। वरु॑णस्य॒ पाशः॑। पाश॒ इति॒ पाशः॑॥ ॥ [१७] ॥

(मि॒त्रस्य॒त्रयो॑विꣳशतिश्च) ॥ ९ ॥

---

अ॒ग्नेरा॑ति॒थ्यम्। आ॒ति॒थ्यम॑सि। अ॒सि॒ विष्ण॑वे। विष्ण॑वे त्वा। त्वा॒ सोम॑स्य। सोम॑स्याति॒थ्यम्। आ॒ति॒थ्यम॑सि। अ॒सि॒ विष्ण॑वे। विष्ण॑वे त्वा। त्वाऽति॑थेः। अति॑थेराति॒थ्यम्। आ॒ति॒थ्यम॑सि। अ॒सि॒ विष्ण॑वे। विष्ण॑वे त्वा। त्वा॒ऽग्नये᳚। अ॒ग्नये᳚ त्वा। त्वा॒ रा॒य॒स्पो॒ष॒दाव्न्ने᳚। रा॒य॒स्पो॒ष॒दाव्न्ने॒ विष्ण॑वे। रा॒य॒स्पो॒ष॒दाव्न्न॒ इति॑ रायस्पोष—दाव्न्ने᳚। विष्ण॑वे त्वा। त्वा॒ श्ये॒नाय॑। श्ये॒नाय॑ त्वा। त्वा॒ सो॒म॒भृते᳚। सो॒म॒भृते॒ विष्ण॑वे। सो॒म॒भृ॒त॒ इति॑ सोम—भृते᳚। विष्ण॑वे त्वा। त्वा॒ या। या ते᳚। ते॒ धामा॑नि। धामा॑नि ह॒विषा᳚। ह॒विषा॒ यज॑न्ति। यज॑न्ति॒ ता। ता ते᳚। ते॒ विश्वा᳚।

विश्वा परिभूः। परिभूरस्तु। परिभूरिति परि—भूः। अस्तु यज्ञम्। यज्ञं गयस्फानः। गयस्फानः प्रतरणः। गयस्फान इति गय—स्फानः। प्रतरणः सुवीरः। प्रतरण इति प्र—तरणः। सुवी-रोऽवीरहा। सुवीर इति सु—वीरः। अवीरहा प्र। अवीरहेत्यवीर—हा। प्र चर। चरा सोम। सोम दुर्यान्। दुर्यानदित्याः। अदित्याः सदः। सदोऽसि। अस्यदित्याः। अदित्याः सदः। सद आ। आ सीद। ॥ [१८] ॥ सीद वरुणः। वरुणोऽसि। असि धृतव्रतः। धृतव्रतो वारुणम्। धृत-व्रत इति धृत—व्रतः। वारुणमसि। असि शंय्योः। शंय्योर् देवानाम्। शंय्योरिति शम्—योः। देवानाꣳ सख्यात्। सख्यान्मा। मा देवानाम्। देवानामपसः। अपसः छिथ्स्महि। छिथ्स्म-ह्यापतये। आपतये त्वा। आपतय इत्या—पतये। त्वा गृह्णामि। गृह्णामि परिपतये। परिपतये त्वा। परिपतय इति परि—पतये। त्वा गृह्णामि। गृह्णामि तनूनप्त्रे। तनूनप्त्रे त्वा। तनूनप्त्र इति तनू—नप्त्रे। त्वा गृह्णामि। गृह्णामि शाक्कराय। शाक्कराय त्वा। त्वा गृह्णामि। गृह्णामि शक्मन्न्। शक्मन्नोजिष्ठाय। ओजिष्ठाय त्वा। त्वा गृह्णामि। गृह्णाम्यनाधृष्टम्। अनाधृष्टमसि। अनाधृष्टमि-त्यना—धृष्टम्। अस्यनाधृष्यम्। अनाधृष्यम् देवानाम्। अनाधृष्यमित्यना—धृष्यम्। देवाना-मोजः। ओजोऽभिशस्तिपाः। अभिशस्तिपा अनभिशस्तेन्यम्। अभिशस्तिपा इत्यभिशस्ति—पाः। अनभिशस्तेन्यमनु। अनभिशस्तेन्यमित्यनभि—शस्तेन्यम्। अनु मे। मे दीख्षाम्। दीख्षाम् दीख्षापतिः। दीख्षापतिर् मन्यताम्। दीख्षापतिरिति दीख्षा—पतिः। मन्यतामनु। अनु तपः। तपस्तपस्पतिः। तपस्पतिरञ्जसा। तपस्पतिरिति तपः—पतिः। अञ्जसा सत्यम्। सत्यमुप। उप गेषम्। गेषꣳ सुविते। सुविते मा। मा धाः। धा इति धाः॥ ॥ [१९] ॥

(आमैकं च) ॥ १० ॥

अꣳशुरꣳशुस्ते। अꣳशुरꣳशुरित्यꣳशुः—अꣳशुः। ते देव। देव सोम। सोमा। आ प्यायताम्। प्यायतामिन्द्राय। इन्द्रायैकधनविदे। एकधनविद आ। एकधनविद इत्येकधन—विदे। आ तुभ्यम्। तुभ्यमिन्द्रः। इन्द्रः प्यायताम्। प्यायता मा। आ त्वम्। त्वमिन्द्राय। इन्द्राय प्यायस्व। प्यायस्वा। आ प्यायय। प्यायय सखीन्। सखीन्थ् सन्या। सन्या मेधया। मेधया स्वस्ति। स्वस्ति ते। ते देव। देव सोम। सोम सुत्याम्। सुत्यामशीय। अशीयेष्टः। एष्टा रायः।

रायः प्र। प्रेषे। इषे भगाय। भगायर्तम्। ऋतमृतवादिभ्यः। ऋतवादिभ्यो नमः। ऋतवादिभ्य इत्यृतवादि—भ्यः। नमो दिवे। दिवे नमः। नमः पृथिव्यै। पृथिव्या अग्ने। अग्ने व्रतपते। व्रतपते त्वम्। व्रतपत इति व्रत—पते। त्वव्ँव्रतानाम्। व्रतानाव्ँव्रतपतिः। व्रतपतिरसि। व्रतपतिरिति व्रत—पतिः। असि या। या मम। मम तनूः। तनूरेषा। एषा सा। सा त्वयि। त्वयि या। ॥ [२०] ॥ या तव। तव तनूः। तनूरियम्। इयꣳ सा। सा मयि। मयि सह। सह नौ। नौ व्रतपते। व्रतपते व्रतिनोः। व्रतपत इति व्रत—पते। व्रतिनोर् व्रतानि। व्रतानि या। या ते। ते अग्ने। अग्ने रुद्रिया। रुद्रिया तनूः। तनूस्तया। तया नः। नः पाहि। पाहि तस्याः। तस्यास्ते। ते स्वाहा। स्वाहा या। या ते। ते अग्ने। अग्नेऽयाशया। अयाशया रजाशया। अयाशयेत्यया—शया। रजाशया हराशया। रजाशयेति रजा—शया। हराशया तनूः। हराशयेति हरा—शया। तनूर् वर्षिष्ठा। वर्षिष्ठा गह्वरेष्ठा। गह्वरेष्ठोग्रम्। गह्वरेष्ठेति गह्वरे—स्था। उग्रव्ँवचः। वचो अप। अपावधीम्। अवधीम् त्वेषम्। त्वेषव्ँवचः। वचो अप। अपावधीम्। अवधीꣳ स्वाहा। स्वाहेति स्वाहा॥ ॥ [२१] ॥

(त्वयिचत्वारिꣳशच्च) ॥ ११ ॥

वित्तायनी मे। वित्तायनीति वित्त—अयनी। मेऽसि। असि तिक्तायनी। तिक्तायनी मे। तिक्तायनीति तिक्त—अयनी। मेऽसि। अस्यवतात्। अवतान्मा। मा नाथितम्। नाथितमवतात्। अवतान्मा। मा व्यथितम्। व्यथितव्ँविदेः। विदेरग्निः। अग्निर् नभः। नभो नाम। नामाग्ने। अग्ने अङ्गिरः। अङ्गिरो यः। योऽस्याम्। अस्याम् पृथिव्याम्। पृथिव्यामसि। अस्यायुषा। आयुषा नाम्ना। नाम्ना। एहि। इहि यत्। यत्ते। तेऽनाधृष्टम्। अनाधृष्टम् नाम। अनाधृष्टमित्यना—धृष्टम्। नाम यज्ञियम्। यज्ञियम् तेन। तेन त्वा। त्वा। आ दधे। दधेऽग्ने। अग्ने अङ्गिरः। अङ्गिरो यः। यो द्वितीयस्याम्। द्वितीयस्याम् तृतीयस्याम्। तृतीयस्याम् पृथिव्याम्। पृथिव्यामसि। अस्यायुषा। आयुषा नाम्ना। नाम्ना। एहि। इहि यत्। यत्ते। तेऽनाधृष्टम्। अनाधृष्टम् नाम। अनाधृष्टमित्यना—धृष्टम्। नाम यज्ञियम्। ॥ [२२] ॥ यज्ञियम् तेन। तेन त्वा। त्वा। आ दधे। दधे सिꣳहीः। सिꣳहीरसि। असि महिषीः। महिषीरसि।

अस्युरु। उरु प्रथस्व। प्रथस्वोरु। उरु ते। ते यज्ञपतिः। यज्ञपतिः प्रथताम्। यज्ञपति-रिति यज्ञ—पतिः। प्रथताम् ध्रुवा। ध्रुवाऽसि। असि देवेभ्यः। देवेभ्यः शुन्धस्व। शुन्धस्व देवेभ्यः। देवेभ्यः शुम्भस्व। शुम्भस्वेन्द्रघोषः। इन्द्रघोषस्त्वा। इन्द्रघोष इतीन्द्र—घोषः। त्वा वसुभिः। वसुभिः पुरस्तात्। वसुभिरिति वसु—भिः। पुरस्तात् पातु। पातु मनोजवाः। मनो-जवास्त्वा। मनोजवा इति मनः—जवाः। त्वा पितृभिः। पितृभिर् दक्षिणतः। पितृभिरिति पितृ—भिः। दक्षिणतः पातु। पातु प्रचेताः। प्रचेतास्त्वा। प्रचेता इति प्र—चेताः। त्वा रुद्रैः। रुद्रैः पश्चात्। पश्चात् पातु। पातु विश्वकर्मा। विश्वकर्मा त्वा। विश्वकर्मेति विश्व—कर्मा। त्वाऽऽदित्यैः। आदित्यैरुत्तरतः। उत्तरतः पातु। उत्तरत इत्युत्—तरतः। पातु सिꣳहीः। सिꣳहीरसि। असि सपत्नसाही। सपत्नसाही स्वाहा। सपत्नसाहीति सपत्न—साही। स्वाहा सिꣳहीः। सिꣳहीरसि। असि सुप्रजावनिः। सुप्रजावनिः स्वाहा। सुप्रजावनिरिति सुप्रजा—वनिः। स्वाहा सिꣳहीः। सिꣳहीरसि। ॥ [२३] ॥ असि रायस्पोषवनिः। रायस्पोषवनिः स्वाहा। रायस्पोषवनिरिति रायस्पोष—वनिः। स्वाहा सिꣳहीः। सिꣳहीरसि। अस्यादित्य-वनिः। आदित्यवनिः स्वाहा। आदित्यवनिरित्यादित्य—वनिः। स्वाहा सिꣳहीः। सिꣳहीरसि। अस्या। आ वह। वह देवान्। देवान् देवयते। देवयते यजमानाय। देवयत इति देव—यते। यजमानाय स्वाहा। स्वाहा भूतेभ्यः। भूतेभ्यस्त्वा। त्वा विश्वायुः। विश्वायुरसि। विश्वायुरिति विश्व—आयुः। असि पृथिवीम्। पृथिवीम् दृꣳह। दृꣳह ध्रुवक्षित्। ध्रुवक्षिदसि। ध्रुवक्षि-दिति ध्रुव—क्षित्। अस्यन्तरिक्षम्। अन्तरिक्षम् दृꣳह। दृꣳहाच्युतक्षित्। अच्युतक्षि-दसि। अच्युतक्षिदित्यच्युत—क्षित्। असि दिवम्। दिवम् दृꣳह। दृꣳहाग्नेः। अग्नेर् भस्म। भस्मासि। अस्यग्नेः। अग्नेः पुरीषम्। पुरीषमसि। असीत्यसि॥ ॥ [२४] ॥

(नामसुप्रजावनिः स्वाहा सिꣳहीःपञ्चत्रिꣳशच्च) ॥ १२ ॥

युञ्जते मनः। मन उत। उत युञ्जते। युञ्जते धियः। धियो विप्राः। विप्रा विप्रस्य। विप्रस्य बृहतः। बृहतो विपश्चितः। विपश्चित इति विपश्चितः॥ वि होत्राः। होत्रा दधे। दधे वयुनावित्। वयुनाविदेकः। वयुनाविदिति वयुन—वित्। एक इत्। इन् मही। मही देवस्य। देवस्य सवितुः।

सवितुः परिष्टुतिः। परिष्टुतिरिति परि—स्तुतिः॥ सुवाग् देव। सुवागिति सु—वाक्। देव दुर्यान्। दुर्याꣳ आ। आ वद। वद देवश्रुतौ। देवश्रुतौ देवेषु। देवश्रुताविति देव—श्रुतौ। देवेष्वा। आ घोषेथाम्। घोषेथामा। आ नः। नो वीरः। वीरो जायताम्। जायताम् कर्मण्यः। कर्मण्यो यम्। यꣳ सर्वे। सर्वेऽनुजीवाम। अनुजीवाम यः। अनुजीवामेत्यनु—जीवाम। यो बहूनाम्। बहूनामसत्। असद् वशी। वशीति वशी॥ इदव्विँष्णुः। विष्णुर् वि। वि चक्रमे। चक्रमे त्रेधा। त्रेधा नि। नि दधे। दधे पदम्। पदमिति पदम्॥ समूढमस्य। समूढमिति सं—ऊढम्। अस्य पाꣳसुरे। ॥ [२५] ॥ पाꣳसुर इरावती। इरावती धेनुमती। इरावती इतीरा—वती। धेनुमती हि। धेनुमती इति धेनु—मती। हि भूतम्। भूतꣳ सूयवसिनी। सूयवसिनी मनवे। सूयवसिनी इति सु—यवसिनी। मनवे यशस्ये। यशस्ये इति यशस्ये॥ व्यस्कभ्नात्। अस्कभ्नाद् रोदसी। रोदसी विष्णुः। रोदसी इति रोदसी। विष्णुरेते। एते दाधार। एते इत्येते। दाधार पृथिवीम्। पृथिवीमभितः। अभितो मयूखैः। मयूखैरिति मयूखैः॥ प्राची प्र। प्राची इति प्राची। प्रेतम्। इतमद्ध्वरम्। अद्ध्वरम् कल्पयन्ती। कल्पयन्ती ऊर्द्ध्वम्। कल्पयन्ती इति कल्पयन्ती। ऊर्द्ध्वय्यँज्ञम्। यज्ञं नयतम्। नयतम् मा। मा जीह्वरतम्। जीह्वरतमत्र। अत्र रमेथाम्। रमे-थावँर्ष्मन्न्। वर्ष्मन् पृथिव्याः। पृथिव्या दिवः। दिवो वा। वा विष्णो। विष्णवुत। उत वा। वा पृथिव्याः। पृथिव्या महः। महो वा। वा विष्णो। विष्णवुत। उत वा। वाऽन्तरिक्षात्। अन्तरि-क्षाद्धस्तौ। हस्तौ पृणस्व। पृणस्व बहुभिः। बहुभिर् वसव्यैः। बहुभिरिति बहु—भिः। वसव्यैरा। आ प्र। प्र यच्छ। यच्छ दक्षिणात्। ॥ [२६] ॥ दक्षिणादा। ओत। उत सव्यात्। सव्या-दिति सव्यात्॥ विष्णोर् नुकम्। नुकव्वीँर्याणि। वीर्याणि प्र। प्र वोचम्। वोचय्यँः। यः पार्थि-वानि। पार्थिवानि विममे। विममे रजाꣳसि। विमम इति वि—ममे। रजाꣳसि यः। यो अस्क-भायत्। अस्कभायदुत्तरम्। उत्तरꣳ सधस्थम्। उत्तरमित्युत्—तरम्। सधस्थव्विँचक्रमाणः। सधस्थमिति सध—स्थम्। विचक्रमाणस्त्रेधा। विचक्रमाण इति वि—चक्रमाणः। त्रेधोरुगायः। उरुगायो विष्णोः। उरुगाय इत्युरु—गायः। विष्णो रराटम्। रराटमसि। असि विष्णोः। विष्णोः पृष्ठम्। पृष्ठमसि। असि विष्णोः। विष्णोः श्नप्त्रे। श्नप्त्रे स्थः। श्नप्त्रे इति श्नप्त्रे। स्थो विष्णोः।

विष्णोः स्यूः। स्यूरसि। असि विष्णोः। विष्णो ध्रुवम्। ध्रुवमसि। असि वैष्णवम्। वैष्णवमसि। असि विष्णवे। विष्णवे त्वा। त्वेति त्वा॥ ॥ [२७] ॥

(अस्ययच्छैकान्नचत्वारिꣳशच्च) ॥ १३ ॥

---

कृणुष्व पाजः। पाजः प्रसितिम्। प्रसितिम् न। प्रसितिमिति प्र—सितिम्। न पृथ्वीम्। पृथ्वीय्ँयाहि। याहि राजा। राजेव। इवामवान्। अमवाꣳ इभेन। अमवानित्यम—वान्। इभेनेतीभेन॥ तृष्वीमनु। अनु प्रसितिम्। प्रसितिम् द्रूणानः। प्रसितिमिति प्र—सितिम्। द्रूणानोऽस्ता। अस्ताऽसि। असि विद्ध्य। विद्ध्य रक्षसः। रक्षस स्तपिष्ठैः। तपिष्ठैरिति तपिष्ठैः॥ तव भ्रमासः। भ्रमास आशुया। आशुया पतन्ति। पतन्त्यनु। अनु स्पृश। स्पृश धृषता। धृषता शोशुचानः। शोशुचान इति शोशुचानः॥ तपूꣳष्यग्ने। अग्ने जुह्वा। जुह्वा पतङ्गान्। पतङ्गानसन्दितः। असन्दितो वि। असन्दित इत्यसं—दितः। वि सृज। सृज विष्वक्। विष्वगुल्काः। उल्का इत्युल्काः॥ प्रति स्पशः। स्पशो वि। वि सृज। सृज तूर्णितमः। तूर्णितमो भव। तूर्णितम इति तूर्णि—तमः। भवा पायुः। पायुर् विशः। विशो अस्याः। अस्या अदब्धः। अदब्ध इत्यदब्धः॥ यो नः। नो दूरे। दूरे अघशꣳसः। अघशꣳसो यः। अघशꣳस इत्यघ—शꣳसः। ॥ [२८] ॥ यो अन्ति। अन्त्यग्ने। अग्ने माकिः। माकिष्टे। ते व्यथिः। व्यथिरा। आ दधर्षीत्। दधर्षीदिति दधर्षीत्॥ उदग्ने। अग्ने तिष्ठ। तिष्ठ प्रति। प्रत्या। आ तनुष्व। तनुष्व नि। न्यमित्रान्। अमित्राꣳ ओषतात्। ओषतात् तिग्महेते। तिग्महेत इति तिग्म—हेते॥ यो नः। नो अरातिम्। अरातिꣳ समिधान। समिधान चक्रे। समिधानेति सं—इधान। चक्रे नीचा। नीचा तम्। तम् धक्षि। धक्ष्यतसम्। अतसम् न। न शुष्कम्। शुष्कमिति शुष्कम्॥ ऊर्द्ध्वो भव। भव प्रति। प्रति विद्ध्य। विद्ध्याधि। अद्ध्यस्मत्। अस्मदाविः। आविष्कृणुष्व। कृणुष्व दैव्यानि। दैव्यान्यग्ने। अग्न इत्यग्ने॥ अव स्थिरा। स्थिरा तनुहि। तनुहि यातुजूनाम्। यातुजूनाम् जामिम्। जामिमजामिम्। अजामिम् प्र। प्र मृणीहि। मृणीहि शत्रून्। शत्रूनिति शत्रून्॥ स ते। ते जानाति। ॥ [२९] ॥ जानाति सुमतिम्। सुमतिय्ँयविष्ठ। सुमतिमिति सु—मतिम्। यविष्ठ यः। य ईवते। ईवते ब्रह्मणे। ब्रह्मणे गातुम्। गातुमैरत्। ऐरदित्यैरत्॥ विश्वान्यस्मै।

अस्मै सुदिनानि। सुदिनानि रायः। सुदिनानीति सु—दिनानि। रायो द्युम्नानि। द्युम्नान्यर्यः। अर्यो वि। वि दुरः। दुरो अभि। अभि द्यौत्। द्यौदिति द्यौत्॥ सेत्। इदग्ने। अग्ने अस्तु। अस्तु सुभगः। सुभगः सुदानुः। सुभग इति सु—भगः। सुदानुर् यः। सुदानुरिति सु—दानुः। यस्त्वा। त्वा नित्येन। नित्येन हविषा। हविषा यः। य उक्थैः। उक्थैरित्युक्थैः॥ पिप्रीषति स्वे। स्व आयुषि। आयुषि दुरोणे। दुरोणे विश्वा। दुरोण इति दुः—ओने। विश्वेत्। इदस्मै। अस्मै सुदिना। सुदिना सा। सुदिनेति सु—दिना। साऽसत्। असदिष्टिः। इष्टिरितीष्टिः॥ अर्चामि ते। ते सुमतिम्। सुमतिम् घोषि। सुमतिमिति सु—मतिम्। घोष्यर्वाक्। अर्वाख् सम्। सम् ते। ते वावाता। वावाता जरताम्। जरतामियम्। ॥ [३०] ॥ इयम् गीः। गीरिति गीः॥ स्वश्वास्त्वा। स्वश्वा इति सु—अश्वाः। त्वा सुरथाः। सुरथा मर्जयेम। सुरथा इति सु—रथाः। मर्जयेमास्मे। अस्मे ख्षत्राणि। अस्मे इत्यस्मे। ख्षत्राणि धारयेः। धारयेरनु। अनु द्यून्। द्यूनिति द्यून्॥ इह त्वा। त्वा भूरि। भूर्या। आ चरेत्। चरेदुप। उप त्मन्न्। त्मन् दोषावस्तः। दोषावस्तर् दीदिवाꣳसम्। दोषावस्तरिति दोषा—वस्तः। दीदिवाꣳसमनु। अनु द्यून्। द्यूनिति द्यून्॥ क्रीडन्तस्त्वा। त्वा सुमनसः। सुमनसः सपेम। सुमनस इति सु—मनसः। सपेमाभि। अभि द्युम्ना। द्युम्ना तस्थिवाꣳसः। तस्थिवाꣳसो जनानाम्। जनानामिति जनानाम्॥ यस्त्वा। त्वा स्वश्वः। स्वश्वः सुहिरण्यः। स्वश्व इति सु—अश्वः। सुहिरण्यो अग्ने। सुहिरण्य इति सु—हिरण्यः। अग्न उपयाति। उपयाति वसुमता। उपयातीत्युप—याति। वसुमता रथेन। वसुमतेति वसु—मता। रथेनेति रथेन॥ तस्य त्राता। त्राता भवसि। भवसि तस्य। तस्य सखा। सखा यः। यस्ते। त आतिथ्यम्। आतिथ्यमानुषक्। आनुषग् जुजोषत्। जुजोषदिति जुजोषत्॥ महो रुजामि। रुजामि बन्धुता। ॥ [३१] ॥ बन्धुता वचोभिः। वचोभिस्तत्। वचोभिरिति वचः—भिः। तन्मा। मा पितुः। पितुर् गोतमात्। गोतमादनु। अन्वियाय। इयायेतीयाय॥ त्वन्नः। नो अस्य। अस्य वचसः। वचसश्चिकिद्धि। चिकिद्धि होतः। होतर् यविष्ठ। यविष्ठ सुक्रतो। सुक्रतो दमूनाः। सुक्रतो इति सु—क्रतो। दमूना इति दमूनाः॥ अस्वप्नज स्तरणयः। अस्वप्नज इत्यस्वप्न—जः। तरणयः सुशेवाः। सुशेवा अतन्द्रासः। सुशेवा इति सु—शेवाः। अतन्द्रासोऽवृकाः। अवृका अश्रमिष्ठाः। अश्रमिष्ठा इत्यश्रमिष्ठाः॥ ते पायवः। पायवः सध्रियञ्चः।

सद्भिर्यज्ञो निषद्य। निषद्याग्ने। निषद्येति नि—सद्य। अग्ने तव। तव नः। नः पान्तु। पान्त्व-
मूर। अमूरेत्यमूर॥ ये पायवः। पायवो मामतेयम्। मामतेयम् ते। ते अग्ने। अग्ने पश्यन्तः।
पश्यन्तो अन्धम्। अन्धम् दुरितात्। दुरितादरख्षन्न्। दुरितादिति दुः—इतात्। अरख्षन्नित्य-
रख्षन्न्॥ ररख्ष तान्। तान्थ् सुकृतः। सुकृतो विश्ववेदाः। सुकृत इति सु—कृतः। विश्ववेदा
दिप्सन्तः। विश्ववेदा इति विश्व—वेदाः। दिप्सन्त इत्। इद् रिपवः। रिपवो न। ना ह। ह देभुः।
॥ [३२] ॥ देभुरिति देभुः॥ त्वया वयम्। वयꣳ सधन्यः। सधन्यस्त्वोताः। सधन्य इति सध—
न्यः। त्वोता स्तव। तव प्रणीति। प्रणीत्यश्याम। प्रणीतीति प्र—नीती। अश्याम वाजान्।
वाजानिति वाजान्॥ उभा शꣳसा। शꣳसा सूदय। सूदय सत्यताते। सत्यताते ऽनुष्ठुया। सत्य-
तात इति सत्य—ताते। अनुष्ठुया कृणुहि। कृणुह्यह्रयाण। अह्रयाणेत्यह्रयाण॥ अया ते। ते
अग्ने। अग्ने समिधा। समिधा विधेम। समिधेति सं—इधा। विधेम प्रति। प्रति स्तोमम्। स्तोमꣳ
शस्यमानम्। शस्यमानम् गृभाय। गृभायेति गृभाय॥ दहाशसः। अशसो रख्षसः। रख्षसः
पाहि। पाह्यस्मान्। अस्मान् द्रुहः। द्रुहो निदः। निदो मित्रमहः। मित्रमहो अवद्यात्। मित्रमह
इति मित्र—महः। अवद्यादित्यवद्यात्॥ रख्षोहणँव्वाजिनम्। रख्षोहणमिति रख्षः—हनम्।
वाजिनमा। आ जिघर्मि। जिघर्मि मित्रम्। मित्रम् प्रथिष्ठम्। प्रथिष्ठमुप। उप यामि। यामि शर्म।
शर्मेति शर्म॥ शिशानो अग्निः। अग्निः क्रतुभिः। क्रतुभिः समिद्धः। क्रतुभिरिति क्रतु—भिः।
समिद्धः सः। समिद्ध इति सम्—इद्धः। स नः। नो दिवा। दिवा सः। ॥ [३३] ॥ स रिषः।
रिषः पातु। पातु नक्तम्। नक्तमिति नक्तम्॥ वि ज्योतिषा। ज्योतिषा बृहता। बृहता भाति।
भात्यग्निः। अग्निराविः। आविर् विश्वानि। विश्वानि कृणुते। कृणुते महित्वा। महित्वेति महि—
त्वा॥ प्रादेवीः। अदेवीर् मायाः। मायाः सहते। सहते दुरेवाः। दुरेवाः शिशीते। दुरेवा इति
दुः—एवाः। शिशीते शृङ्गे। शृङ्गे रख्षसे। शृङ्गे इति शृङ्गे। रख्षसे विनिख्षे। विनिख्ष
इति वि—निख्षे॥ उत स्वानासः। स्वानासो दिवि। दिविषन्तु। सन्त्वग्नेः। अग्ने स्तिग्मायुधाः।
तिग्मायुधा रख्षसे। तिग्मायुधा इति तिग्म—आयुधाः। रख्षसे हन्तवै। हन्तवा उ। उवित्यु॥
मदे चित्। चिदस्य। अस्य प्र। प्र रुजन्ति। रुजन्ति भामाः। भामा न। न वरन्ते। वरन्ते
परिबाधः। परिबाधो अदेवीः। परिबाध इति परि—बाधः। अदेवीरित्यदेवीः॥ ॥ [३४] ॥

(अ॒घश॑ꣳस॒ःस ते॑जरता॑ꣳरुजामि॒ह दि॒वैक॑चत्वारि॑ꣳशच्च) ॥ १४ ॥

॥ हरिः ॐ ॥

## प्रथमकाण्डे द्वितीयः प्रश्नः — क्रम पाठः — समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| १४ | ३४ |

ॐ